सूर्य ग्रहस्य बीज मंत्र जपं

सूर्य ग्रहस्य बीज मंत्र जपं

आचम्य | प्राणानायम्य | देशकालौ संकीर्त्य | गणपति स्मरणं कृत्वा |

पुनः संकल्पं –
अद्य पूर्वोक्त एवं गुणविशेषण विशिष्टायां शुभतिथौ मम सूर्य ग्रहपीडापरिहारार्थं सूर्य ग्रहदेवता प्रसाद द्वारा आयुरारोग्य ऐश्वर्यादि उत्तमफलावाप्त्यर्थं मम संकल्पित मनोवांछाफलसिद्ध्यर्थं यथा संख्याकं सूर्य ग्रहस्य बीजमंत्र जपं करिष्ये ||

– सूर्यः –

ध्यानं –
पद्मासनः पद्मकरो द्विबाहुः
पद्मद्युतिः सप्ततुरंगवाहः |
दिवाकरो लोकगुरुः किरीटी
मयि प्रसादं विदधातु देवः ||

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिं |
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरं ||

लमित्यादि पंचपूजा –
लं पृथिव्यात्मने गंधं परिकल्पयामि |
हं आकाशात्मने पुष्पं परिकल्पयामि |
यं वाय्वात्मने धूपं परिकल्पयामि |
रं अग्न्यात्मने दीपं परिकल्पयामि |
वं अमृतात्मने नैवेद्यं परिकल्पयामि |
सं सर्वात्मने सर्वोपचारान् परिकल्पयामि |

बीजमंत्रः –
ॐ ह्रां ह्रीं ह्रौं सः सूर्याय नमः | (7000)

समर्पणं –

गुह्याति गुह्य गोप्ता त्वं गृहाणास्मत्कृतं जपं |
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिर ||

अनेन मया कृत सूर्य ग्रहस्य मंत्रजपेन सूर्य ग्रहदेवता सुप्रीतो सुप्रसन्नो वरदो भवंतु |

ॐ शांतिः शांतिः शांतिः |